International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 40-42
© 2026 IJMH
www.themultijournal.com

Received: 22-04-2026
Accepted: 04-05-2026
Publish : 06-05-2026

**धीरजकुमारचौधरी**
शोधार्थी,स्नातकोत्तरव्याकरणविभागः, कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्व-विद्यालयः,कामेश्वरनगरम्,दरभङ्गा, बिहारम्
पदम्-सहायक-अध्यापकः,संस्कृतम् इण्टरमीडिएट कालेज,भरौली (बलिया,उत्तरप्रदेश-२७७५०१)

**Correspondence:**
**धीरजकुमारचौधरी**
शोधार्थी,स्नातकोत्तरव्याकरणविभागः, कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्व-विद्यालयः,कामेश्वरनगरम्,दरभङ्गा, बिहारम्

# "भारतीयज्ञानपरम्परायां किरातार्जुनीयमहाकाव्यस्य वैशिष्ट्यम्"

**धीरजकुमारचौधरी**

भारतीयज्ञानपरम्परायां भारतीयसंस्कृतेः पोषकान्यनेकानि महाकाव्यानि कविभिः विरचितानि सन्ति।तानि सर्वान्यप्येतस्य भारतीयसमाजस्य ज्ञानपरम्परायाः संवाहकानि प्रकाशकानि च सन्ति।तेष्वखिलेष्वपि महाकाव्येषु किरातार्जुनीयमद्वितीयं तथा विशिष्टञ्च वर्तते।महाकविना भारविना विरचितं किरातार्जुनीयमेकं विशिष्टं महाकाव्यं वर्तते यत् बृहत्त्रयीमहाकाव्येष्वपि परिगण्यते महत्वपूर्णं स्थानञ्च विधत्ते।महाकाव्यमिदमर्थगाम्भीर्यदृष्ट्याऽत्यधीकं गाम्भीर्ययुक्तं वर्तते।तस्मादुक्तमुद्भट्टमहा-कविना-**"भारवेरर्थगौरवम्"** इति।अत्रार्थगौरवं नामाऽल्पेषु शब्देषु विपुलार्थस्य सन्निवेश इति।तदर्थस्य प्रतिपादकमेकं वाक्यं वर्तते बहुप्रसिद्धं हिन्दीभाषायां कुत्रचित् तद्यथा-**"गागर में सागर भरना"** (लघुघट एव सागरपूर्णमिति)। तद्वदेवैतस्य भारवेः महाकाव्यस्य वैशिष्ट्यमस्ति यदल्पशब्देनैवाऽनेकेषां गूढभावानां सहजतया प्रकाशनमिति।तस्मादेतस्य महाकवेः एनं गुणमेवोन्मुक्तकण्ठेन प्रशंसति महाकविर्दण्डी अवन्तिसुन्दरीकथायाम्।तद्यथा-

**"प्रदेषतृव्यापि महान्तमर्थं प्रदर्शयन्ति रसमादधान।**
**सा: भारवे: सत्येव रम्या: कृति: कैरिव नोपजीव्या।।"**

अस्यायमाशयो वर्तते यत् रसभावेन परिपूर्णः सत्यर्थस्य प्रकाशयितृदीपिकावत् भारविगिरः कस्य कृते नोपजीव्यायाऽपितु सर्वस्मै मार्गनिर्देशाय ज्ञानप्रकाशकाय च भवतीति सर्वैः ज्ञायते एव।अथ चास्याऽर्थगाम्भीर्यरूपं वैशिष्ट्यात् प्रभावितो भूत्वाऽऽचार्यमल्लिनाथेन भारविकाव्यस्योपमा(तुल-ना,समानता) नारिकेलफलेन समं कृता वर्तते।

यस्य बाह्यकलेवरं दृढं तथा नीरसो भवति तथा चाऽऽन्तरिककलेवरं रसयुक्तं सरलं सुमधुरञ्च भवति।यथोक्तं वर्तते-

**"नारिकेलफलसम्मितं वचो भारवेः सपदि तद् विभज्यते।**
**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेऽप्सितम्।।"**

तथा च डॉ.भोलाशङ्करव्यासेनाऽप्येनं पक्षमनुभूय कथितमस्ति यत् कालिदासस्य काव्येषु द्राक्षीपाको वर्तते।अर्थाद्यथा द्राक्षाफलस्य मुखे स्थापनेन यथा सहजमेव रसः निःसृतो भूत्वा चित्तमास्वाद्यते तथैव कालिदासस्य काव्यं वर्तते।परञ्च महाकविभारवेः काव्ये नारिकेलपाको वर्तते,यथा नारिकेलस्य भञ्जनेऽतिपरिश्रममपेक्षते,तस्मात्तस्य रसः प्राप्यते,तथा च कदाऽपि खण्डनस्याऽतिपरिश्रमस्य पश्चादपीतस्ततः धरायां प्रसरति तथा तेषु किञ्चिदेवावशेषं सहृदस्य हृदयं तोषयतीति। तस्मादेवोक्तं वर्तते महाकविना भारविनोक्तिरियम् - **"सुदुर्लभा सर्वमनोरमा गिरः"** अर्थात् भाषणेऽपि केचिदर्थगौरवमाद्रियन्ते , केचित् भाषासौष्ठवमन्ये माधुर्यमपरे भावप्रकाशनशैलीमिति महति विरोधे सम्प्रति सर्वमनःप्रसादिनी गीः सुदुर्लभेति।

तत्र स्वाभाविकतया सर्वजन"मधुरा भारविगिरो वर्तन्ते।अतः उच्यते श्रीधरदासेन सदुक्तिकर्णामृते-“प्रकृतिमधुरा भारविगिरः" अथ च शरदातनयानुसारेण भारवि वचसि भावरसयोः तादात्म्यं वर्तते। महाकविभारविणा विरचितमेकमेव महाकाव्यमखिलं संस्कृतवाङ्मये महत्वपूर्णं स्थानं विधत्ते।एकं वचनं

कुत्रचित् नीतिग्रन्थे उक्तं वर्तते - **"एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च"** तद्वेदेव महाकविभारवे: एकमेव महाकाव्यं तस्य कीर्तिकौमुदीं चिरस्थायिनीं विदधाति वितनोति च। महाकाव्येऽस्मिन् महाकाव्यस्य यानि लक्षणानि लक्षणग्रन्थेष्वुल्लिखितानि सन्ति।तद्यथा-

**"सर्गबन्धो महाकाव्यं तत्रैको नायको सुर:"**

इत्यादीनि सर्वाण्यप्यत्र सङ्घटन्ते।अथ च वर्ण्यविषयवस्तुदृष्ट्या विचार्यमाणे सति महाकाव्यस्यैतस्य नामकरणमर्जुनकिरातयोर्मध्ये प्रवृत्तस्य समराधारेणैव कृतं वर्तते।एतस्य शब्दस्य विग्रहेणाऽपि तज्ज्ञातुं शक्यते।यथाहि - **" किरातश्च अर्जुनश्च किरातार्जुनौ तौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्"** इति। किरातार्जुनशब्दात् **"शिशु क्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः (अष्टाध्यायी -४.३.८८)** इत्यनेन "छ" इति प्रत्यये तथा तस्य स्थाने **"आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्" (अष्टाध्यायी - ७.१.२)** इत्यनेनेयादेशे सति सिध्यति रूपमिदम्।

एतस्य महाकाव्यस्य विषयवस्तुन: सारभूतं ज्ञानम् आचार्यमल्लिनाथेनोल्लिखितेनैकेन पद्येन सामान्यतया ज्ञातुं शक्यते। तद्यथा-

**"नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज: तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्य: किरात: पुनः।**
**श्रृङ्गारादिरसोऽङ्गमत्रविजयी वीर: प्रधानो रस:,**
**शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभ: फलम्।।"**

अनेन ज्ञायते महाकाव्यस्यैतस्य नायक: श्रेष्ठक्षत्रियकुलोत्पन्नोऽर्जुनो वर्तते तथा चतुर्षु नायकप्रभेदेष्वर्जुनो धीरोदात्तनायको वर्तते।नायकोऽयं गम्भीर: सन् शास्त्रज्ञानकुशलस्तथा व्यवहारकुशलो वर्तते।तस्मात् विपरीतपरिस्थितावपि कदापि शोकावेशाभूतो न भवति।निम्नवचनैरपि तस्य शास्त्रज्ञानस्य व्यवहारस्यावबोधं कर्तुं शक्यते।तद्यथा-

**“विविक्तवर्णाभरणा सुखश्रुति: प्रसादयन्ती।प्रवर्तनाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती।।“(किरातार्जुनीयम्-१४.३)**

उपरोक्तपद्येऽस्मिन्नर्जुनो किरातवेशधारी शिवं प्रति ब्रूते यत् परस्परमसङ्कीर्णवर्णानामाभूषणेन युक्ता श्रवणसुखदा तथा श्रुतिकटुदोषादिरहिता,शत्रूणामपि मन:प्रसादिनी प्रसादगुणयुक्ता तथाऽर्थगाम्भीर्ययुक्ता वाणी पुण्येन विना प्रवृत्ता न भवतीति। तस्मादिदमपि कथ्यते तेन-

**"स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चित:।**
**स्थितायां प्रतिपूरुषं रचौ, सुदुर्लभा सर्वमनोरमा गिरः।।“**

**(किरातार्जुनीयम्-१४.५)**

अस्यामाशयो वर्तते यत् केचित् गिरो वाच्यार्थं प्रशंसन्ति तथाऽपर: केवलं शब्दसामर्थ्यं तस्मात् प्रत्येकं जनस्य भिन्न-भिन्नरुचिवशात् सर्वजनप्रसादिनी वाक् सुदुर्लभैव भवतीति।तस्मात् महाकविरेतादृशीं गिरं काव्योत्कर्षत्वेन स्वीकरोति तथा च कुत्रचिन्महाकविरयं शास्त्रीयवैदुष्यप्रदर्शने सामान्यविषयवस्तूनां वर्णनमपि गाम्भीर्यतया कृतं वर्तते।तद्यथा-किरातार्जुनीयस्य सप्तदशतमे सर्गे शराणामाधारेणाऽर्जुनस्य विजयस्येच्छाया: तुलना वैयाकरणानां शब्दाश्रितार्थस्फुरणेन कृता वर्तते। तद्यथा-

**"संस्कारवत्त्वद् रमयत्सु चेत: प्रयोगशिक्षागुणभूषणेषु।**
**जयं यथार्थेषु परेशु पार्थ: शब्देषु भावार्थमिवाशंषसे।।"**

**(किरातार्जुनीयम्-१७.६)**

उपरोक्तपद्येनाऽर्जुनस्य विद्वत्ताया: तथा च निम्नैकेन पद्येन तस्य विपरीतपरिस्थितावपि कृतस्य धैर्यस्यावलोकनं कर्तुं शक्यते।तद्यथा-

**"तत: किरातस्य वचोभिरुद्धतै:,पराहता शैलइवार्णवाम्बुभि:।**
**जहौ न धैर्यं कुपितोऽपि पाण्डव:,सुदुर्ग्रहान्त: करणा हि साधव:।।"**

**(किरातार्जुनीयम्-१४.१)**

अनेन महाकाव्यस्य नायकोऽयं स्वव्रतस्य वचनस्य तथा धीरताया: पालने दृढप्रतिज्ञतां ज्ञापयति। तथा च महाकाव्येऽस्मिन् प्रतिनायको भवति किरातपति: शङ्कर इति।महाकाव्येऽस्मिन् वीररस: प्रमुखस्तथाऽन्ये श्रृङ्गारादिरसा: अङ्गभूता: वर्तन्ते।तथा चाऽत्रोत्साह: स्थायीभावरूपेण वर्तते।अस्मिन् पाञ्चाली वैदर्भी रीती च वर्तेते। तथा च प्रसादो माधुर्यञ्च काव्यस्य गुणौ वर्तेते।तथा पाशुपतास्त्रस्य लाभो प्रयोजनं वर्तते।कथानकमिदं महाभारतस्य वनपर्वणः स्वीकृतं वर्तते। तस्मादेतस्योपजीव्यं महाभारतमेव।तत्र वनपर्वण्यर्जुनाभिगमनपर्वण: सप्तविंशतिरध्यायादारभ्य कैरातनामकस्यैकचत्वारिंशत्तमपर्व यावत् पञ्चदशाऽध्यायेषु कथेऽयं निरूपिता वर्तते।तत्र द्यूतक्रीडायां कपटेन कौरवात् पराभूतकारणेन राज्यान्मुक्त: युद्धिष्ठिर: द्रौपद्याऽनुजै: सह स्वप्रतिज्ञानुसारं द्वैतवनं जगाम।तत एव कथेयं प्रारभ्यते।

महाकाव्येऽस्मिन् युद्धिष्ठिरसदृशसत्पुरुषसदृशालापै: सम्बन्धितसूक्तिभि: सज्जीवनस्योपयोगिसिद्धान्तानां ज्ञानं प्राप्तुं शक्यते।तत्रोदाहरणतया युद्धिष्ठिरस्यैकं वचनं स्वीकर्तुं शक्यते,यत्र सः शास्त्रज्ञानं वपोरलङ्कारं तथा शान्तस्वभावं शास्त्रज्ञानस्य कान्तिं तथा च पराक्रमार्जितं साफल्यं पराक्रमस्य भूषणं कथयति।तद्यथा-

**"शुचि भूषयति श्रुतं वपु: प्रशमस्तस्य भवत्यलंक्रिया।**
**प्रशमाभरणं पराक्रम: स नयापादितसिद्धिभूषण:।।"**

**(किरातार्जुनीयम्-२.३२)**

उपरोक्तकथनेन जीवनस्योन्नतये शास्त्रज्ञानस्यानिवार्यता स्वीक्रीयते तथा च नीतिपूर्वकपराक्रमस्य माहात्म्यं वर्ण्यते।तथा च महाकाव्येऽस्मिन् पुरुषार्थचतुष्टयस्य वर्णनं स्थाने-स्थाने प्राप्यते परञ्च तेष्वर्थात्मकस्य पुरुषार्थस्य प्राप्तिरर्जुनस्य पाशुपतास्त्रप्राप्तिरूपेण प्रमुखतया वर्तते।महाकाव्य प्रारम्भ: श्रीशब्देन जायते तथा च लक्ष्मीशब्दस्य प्रयोगेन सर्गस्य समाप्तिर्जायते।प्रथमसर्गस्य प्रथमश्लोकेन ज्ञायते तद्यथा-

**"श्रिय: कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदित: समाययौ युधिष्ठिरं द्वैतवने वनेचर:।।"**

**(किरातार्जुनीयम्-१.१)**

अत्र श्रीशब्देन मङ्गलं तथा च वनेचरस्योल्लेखेन विषयवस्तुनो निर्देशोऽपि वाक्पटुनाऽर्थगाम्भीर्ययुक्तं याथार्थ्यभूतं वचनं वनेचर-मुखात् महाकविरयं प्रतिपादयति।तद्यथा-

**"स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे।।"**

**(किरातार्जुनीयम्-१.३)**

तथा च महाकाव्येऽस्मिन् महाकविना स्वकीयभाषासौष्ठवं तथा तेषां गुणानां प्रतिपादनमक्षरशः शब्दशास्त्रस्य तथा काव्यशास्त्रस्य दृष्ट्या कृतं वर्तते ।यथा युधिष्ठिरः भीमस्य प्रशंसायामुच्यते-

**"स्फुटता न पदैरपाकृता न च स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्।। "**

**(किरातार्जुनीयम्-२.२७)**

तथा च भारवेरभिमतं वर्तते यत् प्रत्येकमपि कार्यं गम्भीरतया विचार्यमाणे सति यदि क्रियते चेत् तत्रावश्यं सिद्धिर्प्राप्यते।तद्यथा-

**"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलब्धाः स्वयमेव सम्पदः।।"**

**(किरातार्जुनीयम्-२.३०)**

महाकाव्येऽस्मिन् काव्योत्कर्षस्य हेतवो रसभावध्वनिगुणाऽलङ्कारा: प्रचुररूपेण प्रयुक्ता वर्तन्ते।कविरयं मुख्यरूपेण कलापक्षीयकविर्वर्तते। तस्मादेवाऽयं चित्रकाव्यस्य प्रयोगकर्ता संस्कृतभाषायाः प्रथमकविरिति प्रसिद्धिर्वर्तते।कृत्रिमभाषायाः प्रयोगेन तेन प्रकटितं यत् संस्कृतकाव्यमपि दुरूहं भवितुं शक्यते।एतस्य चित्रकाव्यस्य दिग्दर्शनं तेनास्य महाकाव्यस्य पञ्चदशे सर्गे कृतं वर्तते।तद्यथा-

**"न नोननुन्नो नुन्नोनो नाना नानानना ननु।**
**नुन्नोऽनुन्नो ननुन्नेनो नानेन नुन्ननुन्ननुत्।।"**

**(किरातार्जुनीयम्-१५.१४)**

**"स सासिः सासुसूः सासो येयायेयाययायय:।**
**ललौ लीलां ललोऽलोल: शशीशशिशुशीः शसन्।।"**

**(किरातार्जुनीयम्-१५.५)**

अत्र काव्येऽस्मिन् यमकाऽलङ्कारस्य छटाऽद्भुता वर्तते।महाका-व्येऽस्मिन् प्रथमसर्गे एकस्यैव छन्दसः प्रयोगो वर्तते परञ्च तत्रैवान्तिमं पद्यद्वयं पुष्पिताग्रामालिन्योर्वर्तते।अस्मिन् सर्वस्मात् बृहत्सर्गः एकाशीतिपद्यात्मक एकादशतमः सर्गो वर्तते।तथा च लघूत्तमः सर्गः चतुर्थसर्गो वर्ततेऽष्टत्रिंशत्तमश्लोकात्मक इति।अस्य महाकाव्यस्य नायकोऽर्जुनः पाशुपतास्त्रस्य प्राप्तये इन्द्रकीलनामकपर्वते तपस्यां करोति।नायकस्यैतस्य चारित्रिकविशेषतां प्रतिपादयन् महाकविः भगवन्तं शङ्करं किरातरूपेणोपस्थापयति।महाकविभारवेः सर्वस्वमे-कमेव किरातार्जुनीयं तादृशमर्थगाम्भीर्ययुक्तं चित्रात्मकं महाकाव्यं वर्तते यत् येनैतस्य प्रसिद्धिः विश्वेऽस्मिन् सर्वत्र सञ्जाता वर्तते।तस्मादुच्यते कुत्रचित् टीकायाम् –

**"नवसर्गे किराते च नवसर्गे च नैषधे ।**
**नवसर्गगते माघे नवशब्दो न जायते।।"**

**(आचार्यमल्लिनाथः)**

तस्मादेतस्यारम्भात्सर्गत्रयं **"पाषाणत्रयम्"** इति नाम्ना ज्ञायते। अनेनास्य महाकाव्यस्य प्रौढत्वं विद्वत्समाजेषु ध्वन्यते एव।एतस्य महाकाव्यस्य पञ्चमसर्गस्य नवत्रिंशत्तमं पद्यमाधारीकृत्य नामान्तरं विशेषणमात्रपरम् **"आतपत्रम्"** वर्तते।तद्यथा-

**"उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः। वात्याभिर्वियति विवर्तितः समन्ता दाधत्ते कनकमयातपत्रल-क्ष्मीम्।।"**

**(किरातार्जुनीयम्-५.३९)**

तस्मात् शारदातनयेन स्वकीये भावप्रकाशने उक्तं वर्तते-

**"अनेनाऽयं 'छत्रभारवि' ख्यातिं च गतः।"**

**(भावप्रकाशनम्)**

तथा चैतस्य किरातार्जुनीयस्योपर्येकादश प्रसिद्धाः टीकाग्रन्थाः सन्ति।तेषु सर्वेषु टीकाग्रन्थेषु मल्लिनाथस्य घण्टापथटीका सर्वश्रेष्ठा महत्वपूर्णा च वर्तते।तथा च महाकाव्येऽस्मिन् बहूनि सुप्रसिद्धानि सूक्तानि सन्ति यानि गाम्भीर्यार्थप्रतिपादकतया जीवनस्यानु-भवे,शाश्वतनैतिकमूल्ये, राजनीतौ,लोकव्यवहारे उपयोगीनि तथा चानेकेषां तत्त्वानामुद्घाटकानि शताधिकानि सूक्तानि सन्ति।यस्मिन्न-ल्पशब्दाः सन्तोऽपि ते व्यापकार्थं संसूचयन्ति।तद्या कानिचन सूक्तान्युद्ध्रियन्ते-

**"न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः",**

**"हितं मनोहारि च दुर्लभं वचः","समुन्नयन् भूतिमनार्य संगमात्",**

**"वरं विरोधोऽपि समं महात्मभिः", "विचित्ररूपा खलु चित्तवृत्तयः" ,**

**"अविवेको परमापदां पदम्" , "सुदुर्लभा सर्वमनोरमा गिरः",**

**वसन्ति हि प्रेम्णि गुणाः न वस्तुनि "** ,

एतानि कानिचन प्रसिद्धानि सूक्तानि व्यापकार्थतया विदुषां जिह्वाग्रे नृत्यन्ति सर्वदैव व्यवहारे व्याख्याने च।तस्मादेव महाकाव्यमिदमादर्शं मत्वैव पश्चाद्वर्तिनः महाकावयः स्वकीयस्य महाकाव्यस्य रचनामकरोदित्यनुमातुं शक्यते।यथा-माघेन शिशुपा-लवधं,तथा श्रीहर्षेण नैषधीयचरितं विरचितम्।अनेनोपर्युक्तेन विवेचनेन सर्वतोभावेन सिध्यति यत् सर्वजनोपयोगिकं सार्वकालिकं विशिष्टमर्थगाम्भीर्ययुक्तं महाकाव्यमिदं वर्तते यादृशं नान्यत् महाकाव्यमित्यलम्।

**सन्दर्भग्रन्थसूची-**


१. किरातार्जुनीयम्-श्रीसमीरशर्मा चौखम्बा विद्या भवन,

२.किरातार्जुनीयम्-महोपाध्यायश्रीमल्लिनाथसूरिकृतया घण्टापथ-व्याख्यया पण्डितश्रीगङ्गाधरशर्मणा पं० श्री परमेश्वरदीनपा-ण्डेयकृतया 'सुधा व्याख्यया (चौखम्बा प्रकाशन(वाराणसी) समलङ्कृतम्,

३. संस्कृत साहित्य का इतिहास - कपिलदेवद्विवेदी

४.अष्टाध्यायी